শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে একচৎৱারিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একচৎৱারিংশং দশকম্॥

## পূতনাশরীরদাহৱর্ণনম্, গোপীনাং বালাললনকৌতুকৱর্ণনম্ চ

ৱ্রজেশ্ৱরঃ শৌরিৱচো নিশম্য
সমাৱ্রজন্নধ্ৱনি ভীতচেতাঃ।
নিষ্পিষ্টনিশ্শেষতরুং নিরীক্ষ্য
কঞ্চিৎপদার্থং শরণং গতস্ত্ৱাম্॥ **41.1** ॥

নিশম্য গোপীৱচনাদুদন্তং
সর্ৱেঽপি গোপা ভযৱিস্মযান্ধাঃ।
ৎৱৎপাতিতং ঘোরপিশাচদেহং
দেহুর্ৱিদূরেঽথ কুঠারকৃত্তম্॥ **41.2** ॥

ৎৱৎপীতপূতস্তনতচ্ছরীরাৎ
সমুচ্চলন্নুচ্চতরো হি ধূমঃ।
শঙ্কামধাদাগরৱঃ কিমেষ
কিং চান্দনো গৌল্গুলৱোঽথৱেতি॥ **41.3** ॥

মদঙ্গসঙ্গস্য ফলং ন দূরে
ক্ষণেন তাৱৎ ভৱতামপি স্যাৎ।
ইত্যুল্লপন্ ৱল্লৱতল্লজেভ্যঃ
ৎৱং পূতনামাতনুথাঃ সুগন্ধিম্॥ **41.4** ॥

চিত্রং পিশাচ্যা ন হতঃ কুমারঃ
চিত্রং পুরৈৱাকথি শৌরিণেদম্।

ইতি প্রশংসন্ কিল গোপলোকো
  ভৱন্মুখালোকরসে ন্যমাঙ্ক্ষীৎ॥ **41.5** ॥

দিনে দিনেঽথ প্রতিৱৃদ্ধলক্ষ্মী -
  রক্ষীণমাঙ্গল্যশতো ৱ্রজোঽযম্।
ভৱন্নিৱাসাদযি ৱাসুদেৱ
  প্রমোদসান্দ্রঃ পরিতো ৱিরেজে॥ **41.6** ॥

গৃহেষু তে কোমলরূপহাস -
  মিথঃ কথাসঙ্কুলিতাঃ কমন্যঃ।
ৱৃত্তেষু কৃত্যেষু ভৱন্নিরীক্ষা -
  সমাগতাঃ প্রত্যহমত্যনন্দন্॥ **41.7** ॥

অহো কুমারো মযি দত্তদৃষ্টিঃ
  স্মিতং কৃতং মাং প্রতি ৱৎসকেন।
এহ্যেহি মামিত্যুপসার্য পাণী
  ৎৱযীশ কিং কিং ন কৃতং ৱধূভিঃ॥ **41.8** ॥

ভৱদ্ৱপুঃ স্পর্শনকৌতুকেন
  করাৎকরং গোপৱধূজনেন।
নীতস্ত্ৱমাতাম্রসরোজমালা -
  ৱ্যালম্বিলোলম্বতুলামলাসীঃ॥ **41.9** ॥

নিপাযযন্তী স্তনমঙ্কগং ৎৱাং
  ৱিলোকযন্তী ৱদনং হসন্তী।
দশাং যশোদা কতমান্ন ভেজে
  স তাদৃশঃ পাহি হরে গদান্মাম্॥ **41.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একচৎৱারিংশং দশকং সমাপ্তম্॥